सो [illegible] रायच मासम्वत्सरे अद्य दिवसे ओं नमो नमः ॥ ओं
नमो नमः ॥ ततोऽपसव्येन ॥ मोटकं कुशजलान्यादाय ॥ अमु
क गोत्रा समक्षितममुक शर्मा सोऽहं अहं प्रतिष्ठास्मिं च यद्दक्षिणा
रजतं चंद्र दैवतं यथा परिमितं यथा नाम गोत्राय तुभ्य महं संप्र
दे ॥ दक्षिणां दत्वा ॥ अपसेनाभिरंभ्यतां इति पिण्डान् जनमः ॥ ओं वाजे
वाजे वत वाजिनो धनेषु । विप्रा अमृता ऋतज्ञा अस्य मध्वः पिब
मा दयध्वं तृ ॥ प्रजागतः ॥ पथिभि देवयानैरिति कर्म । पात्रं जलेषु
दक्षिणां कृत्वा ॥ ततोऽपसव्येन दीपानि वापनं आचम्य सव्येन ॥ म
न्त्र [illegible] हीनं क्रियाहीनं विधिहीनं च यद्भवेत् तत्सर्वं सम्यतां देवपरे
टि

पु

एको ॥८॥ फलं तद् समुमे ॥ अथ सर्वश्राद्धनमस्कारः नमः सवित्रेति मंत्रेण ॥ यस्य स्मृत्या
च नामोक्त्या तपोयज्ञक्रीयादिषु न्यूनं संपूर्णतां प्रसादजातः परमपुरुषसमुमे ॥ एकोद्दिष्टश्रा
द्धं संपूर्णं ॥ ०: ॥ अथ शय्यादानप्रयोगः ॥ महाभारते ॥ शय्यां सास्तरणोपेतां
सुदक्षादनसंवृतां ॥ प्रदद्याद्यः सुविप्रमुच्छ्रुतस्यापि महत्फलं ॥ सु
रूपः सुभगः श्रीमान स्त्रीसहस्राभिसंवृतः ॥ दमानवसिरक्त्रा सास्वर्ग
लोके महीयते ॥ विष्णुसाहत्तामां ॥ शय्यादानं च येद्घातस्यापि प्रज्ञराविस्मरं ॥
सर्वकाले प्रदातव्यं आपुरामदिने शुच ॥ गजदंतैर्मयवाखैर्वा सुवर्णरजतै
र्विना ॥ काष्ठगात्राशिरापादाश्च सुदृढसुसा ॥ अलाभेपी चकर्त्तव्या तु का
ष्ठमयीं शुभां ॥ संध्याभ्रपटलाकारैरास्तरणारतौ शुभैः ॥ शिरोपधानैः सवि
तानैः प्रवारैः वस्त्रैः संयुतैः ॥ मशालासौवर्णपात्रैः अस्त्रोपेता मेच्छ्र संयुता ॥ फन राम
पुष्पैः सुगंधैः अक्षतांबुजाद्यैः सुविस्तारे ॥ दक्षिणोपादत्राणाश्च नानाद्रव्यै ॥८॥

सुवेषं धार्यतां स्म हासोयं प्रतिगृह्यतां ॥ वस्त्रं ॥ ब्रह्मणा निर्मितं सूत्रं विष्णुग्रंथि
समन्वितं यज्ञोपवीतं परमं गृह्यतां च जनार्दनः ॥ यज्ञोपवीतं ॥ मलयाचलसंभ
तं शीतमानंदवर्धनं कासमीरघनसारामचंदनं प्रतिगृह्यतां ॥ चंदनं ॥ नानावि
धानि पुष्पानि ऋतुकालोद्भवानि मयार्पितानि सर्वाणि पूजार्थं प्रतिगृह्यतां ॥
॥ पुष्पं ॥ वनस्पतिरसोत्पन्नं सुगंधाढ्यं मनोहरं आघ्रेयं सर्वदेवानां धूपोयं प्रतिगृ
ह्यतां ॥ धूपं ॥ घृतवर्तीसमायुक्तं पावकेरसंभव दीपं गृहाण देवेश त्रैलोक
तिमिरापहं ॥ दीपं ॥ अन्नं चतुर्विधं स्वादुरसैः षड्भिः समन्वितं भक्ष्यभोज्यस
मायुक्तं नैवेद्यं प्रतिगृह्यतां ॥ नैवेद्यं ॥ नागवल्लीदलं दिव्यं पूगीसमन्वितं क फल
र्पूरेणा समायुक्तं तांबूलं प्रतिगृह्यतां ॥ तांबूलं ॥ उपचारैः समस्तैस्तु यत्फलं ज्ञा
मयाहृता तत्सर्वं फलदां तां यातु प्रदक्षिणा प्रभावतः ॥ दक्षिणा ॥ यानिकानि

ए वो
॥२॥

च पापानि ब्रह्महत्यासमानि च तानितानि विनश्यंति प्रदक्षिणां पदे पदे ॥ अप
र स्त्रिराा ॥ त्राहिमां पापिनं घोरं धर्माचारविवर्जितं नमस्कारेण देवेश सं
सारार्णव पाजिनः ॥ नमस्कारः ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर यत्पू
जितोसि मया देव परिपूर्णं तदस्तु मे ॥ समापयुक्तं ॥ आवाहनं ना जानामि न जानं
मि विसर्जनं पूजां चैव न जानामि त्वं गतिः परमेश्वर ॥ इति विष्णु षोडशोपचा
र पूजाविधिः ० ॥ श्रीगणेशाय नमः ॥ अथैकोद्दिष्ट श्राद्धविधिः ॥ ततः क्रमः
ततः आचम्य ॥ ततो शिखाबंधनं ॥ अपसव्यं ॥ अद्येत्यादि अमुक गोत्रस्यास्म
त्पितुरमुकशर्मणोऽघकतं अस्य याह निमित्तसांवत्सरे एकोश्राद्धे अनेन
ताम्बूलेन तुलसीदल चंदन तिलाक्षतेन सपात्रानि मंत्रेण ततोऽक्षिति प्रतिष २
च नमः ॥ अक्रोधनैः शौचपरैः सततं सत्यवादिभिः भवितव्यं भवद्भिश्च तथा च श्रा
द्धकर्मणि ॥ सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः भवि ... भवद्भि

मि

अद्य मयाच श्राद्धकर्मणि ॥ अथ चरणप्रक्षालनं ॥ नमोस्त्वनंतायेति मंत्रेण ॥
तुलसीपत्रेण संपूज्य ॥ मोटककुशमादाय ॥ ॐ अद्यामुकगोत्रा स्मत्पितर
मुकशर्मणाय ममादर्शितुभ्यं स्वधानमः ॥ इति शुद्धाय ॥ ततस मेना
च म्य ॥ आगतो भवानिदमासनमास्यतांमास्ये ॥ अथ प्रतिज्ञा ॥ अजुके
शानादाय ॥ ॐ अद्येत्यादि अमुकगोत्रा स्मत्पितरमुकशर्मणः सांवत्
सिकैकोदिष्टश्राद्धे स्वेदुर्वैः महं करिष्ये ॥ आवाहनं नाग्नौकरणं न वि
श्वेदेवाः तत्रापंजोकः संकोदिष्टे देवहीनमेकार्घैकपवित्रकं ॥ ततः
कमेपात्र महं करिष्ये ॥ ॐ कुरुष्व ॥ शन्नोदेवीरभिष्टय आपोभवंतु
पीतये सं[illegible]रभिस्रवंतु नः ॥ जलं ॥ पवित्रेस्थो ॥ पवित्रकं ॥ तिलोसी
तितिलान् [illegible]सीति यवान् ॥ जंधद्वारामिति गंधं ॥ श्रीअस्त्विति पुष्पम् ॥

श्रा०
॥३॥

कर्मपात्रं संपन्नमस्तु संपन्नमस्तु ॥ सम्पूर्णपात्रेति पठनं ॥ प्रतिग्रहके
षां ॥ पंचत्रैशेति पठनं ॥ ततः कर्मपात्रजलेन श्राद्धवस्तु निक्षिपयेत् ॥
अपवित्रः पवित्रो वेति मंत्रेण ॥ अपयांतु दुस्तरा सर्वेऽसुरा राक्षसाश्च ये ॥
सर्वविघ्नोपशांत्यर्थं दद्याद्भिस्तकुशांस्तिलान् ॥ कुशांस्तिलमादाय ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षंतु मे दिशम् ॥ अपहतारमसादै
र्षो शिवेदिषदः पांतु याम्यायां पितरस्तथा स्विष्टाः प्रतीचीमाज्यपास्तद्व उ
दीचीमपि सोमपाः ॥ विश्वेदेवा अधः पांतु ऊर्द्ध्वं पांतु मरुद्गणाः ॥ रक्षो
भूतपिशाचेभ्यः तथैवासुरदोषतः ॥ सर्वतश्चाधिपस्तेषां यमो रक्षां
करोतु मे ॥ अथवामभाजेनीवीवंधनं ॥ तूष्णीम् ॥ अथ जपः ॥ देवताभ्यः
पितृभ्यश्च महायोगिभ्य एव च ॥ नमः स्वाहायै स्वधायै नित्यमेव नमो नमः ॥

ततो गायत्रीं जपेत् ॥ सप्तव्याधा दशार्णे मृगाः कालिंजरे गिरौ ॥ च
क्रवाकाः सरद्वीपे हंसाः सरसि मानसे ॥ तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वे
दपारगाः ॥ प्रस्थिता दूरमध्वानं यूयं किमवसीदथ ॥ अद्यासनं ॥ अ
मुकगोत्रास्मत्पितरमुकशर्मारौकोद्दिष्टश्राद्धे इदमासनं तुभ्यं स्व
धा ॥ अथ हस्तार्घपात्रमहं करिष्ये ॥ कुरुष्व ॥ हस्तार्घपात्रस्यासनमा
सने पात्रं पात्रे विन्यस्य तिलजलतुलसीदलचंदनादि समर्प्य वा
महस्ते कृत्वा दक्षिणहस्तेनाच्छाद्य ॥ ॐ या दिव्या आपः पयसा संबभूवुर्या अंत
रिक्षा उत पार्थिवीर्या हिरण्यवर्णा यज्ञियास्तान आपः शिवाः शं स्यो
नाः सुहवा भवंतु ॥ इत्युदकांतरं दत्वा ॥ अमुकगोत्रास्मत्पितरमुकश

र्मशोक हस्तार्घं तुभ्यं स्वधा ॥ अर्घे पुनः प्रत्यर्घमस्तु ॥ ततः पूर्वाभिमुखः शुचिं
धं तांबोलकः पटघदनमसि ॥ कर्मपात्रजलेन नेत्रहृदयं संस्पृश्य ॥ नेत्रसंमुदि
व पुरस्तात् कुर्म्मगुद्र रतस्थे मरारदरातम ॥ ततः प्रसवेन ॥ पितः स्पृ
न मसि ॥ अर्घेगु स्वं कृत्वा कुशाग्रं यातु पर्वस्त्वा चंदनादिभिरभ्यर्च्य ॥
ॐ अद्यामुकगोत्रास्मत्पितारमुकशर्म्मा सपत्नीक मासिकैकोद्दिष्ट श्राद्धे
एतान्यर्चनानि तुभ्यं स्वधा ॥ अर्चनविधेः सर्वं परिपूर्णमस्तु ॥ ततः नै
वेद्यं नाचम्य ॥ ततः अन्नं संकल्पः ॥ अन्नपात्रं दक्षिणहस्तेन आचम्य ॥
॥ इतिपठेत् ॥ ॐ पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते
अमृतं जुहोमि स्वाहा ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढम
स्य पांसुरे विष्णोः कव्ये इदं रक्षस्व स्वाहा ॥ इदमन्नमिदमाज्यमिद

मेस्तु एवमेतत्सर्वं कर्म पुंडरीकाक्षाय नमः ॥ अमुकगोत्रा अस्मत्पितर अमुक
शर्मणो वैश्वदेव इदमन्नं यथोपस्कारसहितं तुभ्यं स्वधा ॥ मधु
वातेति पठित्वा ॥ मधु मधु अन्नं सकलस्य सिद्धिरस्तु ॥ पुरुषसूक्तं पाठ
त्वा ॥ अथ विकिरासनम् ॥ असंस्कृतप्रमीतानां त्यागिनां कुलभागिनाम् ॥
उच्छिष्टभागधेयानां दर्भेषु विकिरासनं ॥ अग्निदग्धाश्च ये जीवा
येऽप्यदग्धाः कुले मम ॥ भूमौ दत्तेन तृप्यन्तु तृप्ता यांतु परां गतिम् ॥ इ
ति प्रत्यापोशानं ॥ आचमनं ॥ ततः कुशाच्छिन्नं परिसमूह ॥ पुनराचमनं ॥
स्वदितमिति पृष्ट्वा शेषमन्नं किं क्रियताम् ॥ ततः पिंडमंडलकरणं
कुरुष्व ॥ वेदीं कृत्वा ॥ ये रूपाणीति अङ्गारभ्रमणं ॥ जलेन सिंच्य ॥
अपहता इति रेखाकरणं कृत्वा ॥ छिन्नमूलकुशास्तरणं मुखप

ए॰कै॰
॥५॥

रिमितम्र ॥ मे॰ टकुशामाशनमादाय ॥ अमुकगोत्रास्मत्पितरमुकशा
र्म्मराः साम्वत्सरिकैकोदिष्टश्राद्धे पिंडासने अवनेनिक्ष्व ॥ अथ पिंडं
कर ... म्र ॥ ॐ अद्यामुकगोत्रास्मत्पितः मुकशर्म्मन्नेतत्ते एकोदिष्टश्राद्धे प
म परमान्नपिंड अभ्यञ्जनस्वरूपमनुमंस्वधा ॥ मल्लपुरुषेभ्यो नमः अमि
विभागेभ्यो नमः निरिचमानेभ्यो नमः ॐ ये प भागमजस्रं पंगु ॥ ततः
तवेनाचम्य ॥ उत्तराभिमुखः ॥ पितरस्मरेत् ॥ अत्र पितरो मादयध्वं
यथाभागमावृषापिवत् ॥ अमीवदंत पितरो यथाभागमानुषायध्वं ॥
वामावर्त्तेनासंनियम्य ॥ अपसव्येन पिंडोपरि अक्षतान्स्त्रिपेत् ॥ अद्या
मुकगोत्रास्मत्पितरमुकशर्म्मणाइदं पिंडं प्रत्यवनेनिक्ष्व ॥ नीवीं वि
स्रआचम्येत ॥ जुष्टोसि ॥ अथ सूक्तानि ॥ ॐ नमो वः पितरो रसाय ॐ ... तत्सत्र
त्र

पिरांगंधादिभिरभ्यर्च्य ॥ अमुकगोत्रास्मत्पितरमुकशर्मणान्न आ
दे एतान्यर्चनानि तुभ्यं स्वधा ॥ ततः सव्येन सुप्रोक्षितमस्तु ॥ शिवा आ
पः संतु ॥ अक्षतांश्चारिष्टं चास्तु ॥ सौमनस्यमस्तु ॥ अपां मध्ये स्थिता दे
वाः सर्वमप्सु प्रतिष्ठितं ॥ ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवंतु मे ॥
अस्माकं कुले दीर्घमायुरस्तु पुष्टिरस्तु वृद्धिरस्तु ॥ यत्पापं तत्प्रतिहतमस्तु ॥
अक्षोदकदानं ॥ अद्यामुकगोत्रस्मत्पितरमुकशर्मणो गौकोत्तिष्ठ आ
अन्नपानादिकं तदक्षय्यमुपतिष्ठताम् ॥ अघोराः पितरः संतु गोत्रं नो
वर्द्धतां वेदाः संततिरेव च ॥ श्रद्धा नो माव्यगमत्तु ॥ अन्नं च नो बहु भवेम
हि ॥ इत्याशीर्ग्रहीत्वा यं कामं कामयते सोऽस्मैकमः समृद्ध्यते ॥ दीर्घायु

श्रा
॥६॥

स्त्रायवलायवर्चसेस्मुप्रजायस्त्राय महसाग्रजोजीवशरदःशतम्॥ धन
वानपुत्रवान यशस्वान लक्ष्मीवान॥ ततोहस्तार्घपात्रोपकर
त्रं यमादाय॥ अमुकगोत्रायामुकशर्मसोमद्योच्यतामस्तु॥ स्वधाग्रमै
र्ज्जेदानम॥ ऊर्ज्जंवहंतीममृतंघृतंपयः कीलालंपरिस्रुतंस्वधास्थतर्प
तमेपितॄन्॥ ततःपिंडसंपन्नमस्तुसंपन्नमस्तु पिंडमास्थापयामिइत्याघाय
स्वं॥ शंखचक्राभ्यांलिखित्वा॥ तत्रपूजनम्॥ शंखायनमः चक्रायनमः॥
गरुडायनमः पिंडोपमोक्षायस्कंधोपरिकृत्वापठनीयोमंत्रः॥ ततः
पिरुडमादायसमर्चयेत॥ वसंतायनमस्तुभ्यंग्रीष्मायनमोनमः नमो
वर्षाभ्यःशरत्संज्ञात्रमत्तवेभ्योनमोनमः॥ हेमंतायनमस्तुभ्यंनम

॥६॥

निरवस्तुस्वरूपमात्रग्राहकं निर्विकल्पकं विशिष्टग्राहकं सविकल्पकं। अतीतावस्था
वच्छिन्नवस्तुनः इदंत्वेन ग्राहकं प्रत्यभिज्ञा। दुःखसाधनत्वज्ञानं। सुखसाधन
त्वज्ञानमुपादानं। उभयाचनत्वज्ञानमुपेक्षा। नीचैककोटिसंदेहः ऊहः प्रायेणा
र्थः। अनत्लिंगितापत्पको ध्यनवधारणं ज्ञानमनध्यवसायः। प्रयत्नो साध
साधनाधीनं सुखं सांसारिकं इच्छामात्राधीनसाधनसाध्यसुखं स्वर्गः। सां
सिद्धिकत्वं तेजःसंयोगानुसारित्वं। तेजःसंयोगोसाधत्वं नैमित्तिकत्वं। कर्मजः सं
स्कारो वेगः। ज्ञानजः संस्कारो भावना। रज्जुत्वप्रापादकः संस्कारः स्थितिस्था
पकः। अव्यापकत्वे स्वाभावसादेश्यं। तदसाव्यापकत्वं। विहितत्वे कर्मोसाद्यत्वं।

निषिद्धत्वमधर्मो। साधकोभयविपरीतत्वमुदासीनत्वं। निर्बाधकसामान्यं जा
तिः। सबाधकसामान्यमुपाधिः। आरोपितनीलरूपोऽभावोऽन्धकारः। ज्ञाने
सति यो ज्ञानविषयस्तत्। तत्त्वं ज्ञानेन नियमेनावच्छेद्यत्वं। गुणादिषु संख्याव्य
वहारः। संख्याप्रत्यासत्तिनिबंधः। अत एव संख्याप्रत्यासत्तिनिबंधनत्वं। स्व
॥३ समवेतकार्योत्पादकं समवायिकारणं। समवायिकारणप्रत्यासन्नमव
धृतसामर्थ्यमसमवायिकारणं। उभयविपरीतकारणं निमित्तकारणं।
इयत्तानवच्छिन्नपरिमाणयोगित्वं मूर्त्तत्वं। तदभावोऽमूर्त्तत्वं। कार्यायोगव्य ॥६॥

राम

विभूषणौ ॥ चतुःकोणेषु संस्थाप्य यथाशक्त्या युधिष्ठिरः ॥ छत्रं कुंकुमगोधूम
पूर्णपात्रजलस्य च ॥ शय्यासंपूजयित्वा तु मंत्रेणानेन सुव्रताः ॥ कृतांजलि
पुटो भूत्वा कुर्यात् कुर्यात् प्रदक्षिणां ॥ नमः प्रमाणैः देव्यैति प्रणाम्यं च चतुर्दि
शं ॥ अज्ञानमज्ञानविषये शय्यादानात् विचक्षणाः ॥ अघेष्वादि सर्वपापस्
य पूर्वं सुरगणासेव्य विमानं कुरुते इन्द्रपुरं गमने तत्र षष्टिसहस्रव
त र्षं दधिकरणेव क्रीडनं त्रिसहस्र सर्वरत्नासहितं स्वर्गलोकमथोत्तरं त
दुत्तरषष्टियोजनमंडलराजानां तत्र भवेत् कामः शय्यादानमहं कथयिष्ये ॥
गणपति शुद्धभूमौ उक्तविधिना यथाशास्त्रमुपपादितां शय्यां संस्थाप्य ॥ तस्यां सौन
पूजनक वैडूर्यमुखं ॥ प्रतीहीतारं आसने उपविश्य स्वयं यजमानः शुचि ॥ पवित्र
निच्छे ॥८ पाणिः प्राङ्मुखः उपविश्य पादप्रक्षालनादिभिः वरणपूर्वकं कुर्यात् ॥

एको ॥ १२॥

स्वपादौप्रक्षाल्याचम्य ॥ अथैत[?]स्मि[?]श[?]र्वके लक्ष्मीनारायणमूर्त्तिनांपूजनं ॥

षोडशोपचारैस्संकुर्यात्‌ ॥ ततोवरणाआदं[?]कृत्वालक्ष्मीनारायणमूर्त्तिशय्यो

सं परिस्थाप्य[?]भायांगंवेगुष्ठेरलंकृत्वाइदं पक्वे वस्त्रपरिधानंकुर्यात्‌ ॥ दानदेव

ताभ्यइदंमंत्रैचंदनइत्यादि ॥ शय्यांपरजोपलायथाशक्त्यादत्तंदंगंधपुष्पा

घर्तिनंदंपल्लेःपरिधानेवाशांसिअंडलमुद्रिकाचशय्यादानप्रतिग्रहको

पब्राह्मणायतुभ्यमहंसंप्रददे ॥ वरणाअद्विधेपरिपूर्णातामस्तु ॥ अस

वौ न्नमीमदंतेनअस्रान्नविर्म ॥ सुप्रोक्षितादिकंकुर्यात्‌ ॥ ततोभक्तिनम्रःक

तांजलिःशय्यांप्रदक्षिणीकृत्यनमःप्रमाणंपदंदेवैइतिमंत्रेणावत्तुर्दिसेुम

राभ्यडपविश्यदेशकालौस्मृत्वाअमुकगोत्रायअमुकशर्मणेब्राह्म

णायविष्णुरूपायइमांशय्यांसारदारुमयींकोणावत्तुष्टयस्थापित[?] राम

१५

तत्कुंकुमगोधूमजलपूर्णपात्राउक्तिशदिक्प्रदेशस्थापितप्रसोकलशोपरिस्था
पितसपुष्पधान्यां सतुलिकाप्रतिष्ठितां भगंडोपधानकप्रच्छादनप्रदीप्तां
तांबूलजलादर्शकुंकुमस्तोदकर्पूरअगरुचंदनदीपिकाउपानह छत्रचा
मरआसनभोजनजलपात्रादियुक्तां मध्यस्थापितसौवर्णलक्ष्मीनारायणा
प्रतिमायुतां पंचवर्णवितानवतीं गंधपुष्पाद्यर्चितां अंगिसदैवतां दिव्यविमा
नवद्गंधर्वकिंवर्षसहस्रपर्यंतं अप्सरागणासु स्वर्गमञ्चमस्तु लोके षष्टियोज
नविस्तीर्णं ...ड जातिप...प्राप्तये इदं अमुकगोत्राय अमुकशर्मणे ब्राह्मणा
यविष्णुरूपायतुभ्यमहं संप्रददे॥ यस्मात्कृष्णगृहमिदं भुवं सागरजातया॥
शय्या मम सा प्यनुन्या ... तथा जन्मनि जन्मनि॥२॥ इति शय्यादानप्रतिष्ठा सिध्य...

षको

॥८॥

शिरसां च दक्षिणातु भ्र महत्संमदरे ॥ जिल पात्र घटं तं च मुखविलोकन संकल्पयेः ॥
मयमीसंकल्पः तु श्रौदत्तादिवं ...न ॥ अथ पूर्वोक्त विधितं पठेत् ॥ कायेन वाचा ॥
यस्य स्मृत्या च ॥ इति शिवाचा अथ दानं ॥ इदं पात्रोन श्रीविष्णु प्रीतये न मम ॥
श्री ॥ श्रीराम ॥ श्रीराम ॥ श्रीराम ॥ श्रीराम ॥ श्रीराम ॥ श्रीराम ॥ श्रीराम ॥ श्रीराम ॥

राम ॥

वति ज्ञा सामग्री सं ज्ञा मात्रे रा पदार्थ नाम सिद्ध्या ध्यानमुद्दे श्राः। रूपरसगंध
स्पर्श संख्या परिमा रा पृथक्त्व संयोग विभाग परत्वापरत्व गुरुत्व द्रवत्व संस्कार:
पृथ्वी समवेता:। रूप रस स्पर्श संख्या परिमा रा पृथक्त्व संयोग विभाग परत्वा
परत्व गुरुत्व द्रवत्व स्नेह संस्कारा अप्सु समवेता:। रूपस्पर्श संख्या परिमा
रा पृथक्त्व संयोग विभाग परत्वापरत्व द्रवत्व संस्कारास्तेजस समवेता:। स्पर्श
संख्या परिमारा पृथक्त्व संयोग विभाग परत्वापरत्व संस्कारा वायु समवेता:।
संख्या परिमारा पृथक्त्व संयोग विभाग शब्दा आकाश समवेता:। संख्या परिमा
रा पृथक्त्व संयोग विभागाः कालदिक्सु समवेता: संख्या परिमारा पृथक्त्व संयोग
विभाग बुद्धि सुख दुःखेच्छा प्रयत्न धर्माधर्म भावनास समवेता:। संख्या

नम्रप परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंख्याः स्वाश्रयसमवेताः। क दो र्थि०
र्ममूर्त्तद्रव्यसमवेतमनित्यमेव। सामान्यं द्रव्यगुणकर्मसमवेतं। सामान्यं द्र
व्यगुणकर्मसमवेतं। नित्यद्रव्यं त्वसमवेतमेव। विनाशस्तु द्रव्यस्य समवाय्य
समवायिकारणनाशाभ्यां। गुणस्य समवाय्यसमवायिनिमित्तकारणवि मा
नाशविरोधिगुणेभ्यो विनाशः। कर्मणः समवायिकारणविनाशोत्तरसंयो
॥१०॥ गाभ्यां। प्रागभावस्य प्रतियोग्युत्पादकसामग्रीकः। अन्योन्याभावस्य प्रति ॥१०॥
योगिविनाशकारणात्। उत्पत्तिस्तु द्रव्यगुणकर्मणां समवाय्यसमवायिनि
मित्तकारणेभ्यस्तत्र समवायिकारणं द्रव्यमेव। असमवायिकार
णं द्रव्यकर्मणोः संयोग एव। गुणस्य त्वसमवायिकारणं द्वित्वसमानजाती

यद्वान्विद समानजातीयगुणोत्पद्यचित्वमिति। निमित्तकारणं सर्वेषामीश्वराद्
ष्टादि। अन्योन्याभावप्रध्वंसाभावयोस्तु निमित्तादेव केवलादुत्पत्तिरिति। अप
रं तु सकलेरास्त्वं सवोधमिति वैशेषिका मन्यते। व्याप्तिः समानाधिकरणाव्या
वृत्तकं विशेषणं। एकविभक्तिपदवाच्यत्वं समानाधिकरणत्वं। व्यधिकरणं
अवच्छेदकमुपलक्षणं॥ भिन्नविभक्त्यंतपदवाच्यत्वं वैयधिकरण्यं। जाति
प्रसासत्तिकत्वमधिकरणांस्तसमस्तमूर्त्तसंयोगित्वं व्यापकत्वं। विद्यमानयोः
संबंधो युतसिद्धिः। असंबंधयोः संबंधो युतसिद्धिः अप्युदयसाधनाभिप्रो ध
पर्कशास्त्रं। ॥ ७॥ सप्तद्वीपा धारायावद्यावत्सप्त धराधराः। तावत्सप्तपदार्थी

यमस्तत्वस्तत्प्रकाशीनी॥

इति शिवादित्यविरचिता सप्तपदार्थी समाप्ता॥

॥इदं पुस्तकं माधवभट्टेन लिखितं॥ श्रीगणेशाय नमः॥

श्रीगणेशाय नमः॥ रि.घ.